# Bahvrucha Upanishad

# બહ્વૃચોપનિષત્

## Document Information

Text title : Bahvricha Upanishad

File name : bahvricha.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Kannan Subramanian

Proofread by : P.P.Narayanaswami(swami at math.mun.ca

Description-comments : 107/108; Rig-Veda, Shakta Upanishad

Latest update : July, 3, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# બહ્વૃચોપનિષત્

॥ અથ બહ્વૃચોપનિષત્ ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ઠિતમ્ ।
આવિરાવીર્મ એધિ । વેદસ્ય મ આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીઃ ।
અનેનાધીતેનાહોરાત્રાન્સન્દધામિ । ઋતં વદિષ્યામિ ।
સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ । અવતુ મામ્ ।
અવતુ વક્તારમ્ । અવતુ વક્તારમ્ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

બહ્વૃચાખ્યબ્રહ્મવિદ્યામહાખણ્ડાર્થવૈભવમ્ ।
અખણ્ડાનન્દસામ્રાજ્યં રામચન્દ્રપદં ભજે ॥

હરિઃ ૐ ॥

દેવી હ્યેકાગ્ર એવાસીત્ । સૈવ જગદણ્ડમસૃજત્ ।
કામકલેતિ વિજ્ઞાયતે । શ‍ૃંગારકલેતિ વિજ્ઞાયતે ॥ ૧॥

તસ્યા એવ બ્રહ્મા અજીજનત્ । વિષ્ણુરજીજનત્ ।
રુદ્રોઽજીજનત્ । સર્વે મરુદ્ગણા અજીજનત્ ।
ગન્ધર્વાપ્સરસઃ કિન્નરા વાદિત્રવાદિનઃ સમન્તાદજીજનત્ ।
ભોગ્યમજીજનત્। સર્વમજીજનત્ । સર્વં શાક્તમજીજનત્ ।
અણ્ડજં સ્વેદજમુદ્ભિજ્જં જરાયુજમ્ યત્કિંચૈતત્ પ્રાણિ
સ્થાવરજંગમં મનુષ્યમજીજનત્ ॥ ૨॥

સૈષા પરા શક્તિઃ । સૈષા શાંભવીવિદ્યા
કાદિવિદ્યેતિ વા હાદિવિદ્યેતિ વા સાદિવિદ્યેતિ વા ।
રહસ્યમોમોં વાચિ પ્રતિષ્ઠા ॥ ૩॥

સૈવ પુરત્રયં શરીરત્રયં વ્યાપ્ય બહિરન્તરવભાસયન્તી
દેશકાલવસ્ત્વન્તરસંગાન્મહાત્રિપુરસુન્દરી વૈ પ્રત્યક્ચિતિઃ ॥

૪॥

સૈવાત્મા તતોઽન્યમસત્યમનાત્મા । અત એષા
બ્રહ્માસંવિત્તિર્ભાવભાવકલાવિનિર્મુક્તા
ચિદ્વિદ્યાઽદ્વિતીયબ્રહ્મસંવિત્તિઃ સચ્ચિદાનન્દલહરી
મહાત્રિપુરસુન્દરી બહિરન્તરનુપ્રવિશ્ય સ્વયમેકૈવ વિભાતિ ।
યદસ્તિ સન્માત્રમ્ । યદ્વિભાતિ ચિન્માત્રમ્ ।
યત્પ્રિયમાનન્દં તદેતત્ પૂર્વાકારા મહાત્રિપુરસુન્દરી ।
ત્વં ચાહં ચ સર્વં વિશ્વં સર્વદેવતા ઇતરત્
સર્વં મહાત્રિપુરસુન્દરી । સત્યમેકં લલિતાખ્યં વસ્તુ
તદદ્વિતીયમખણ્ડાર્થં પરં બ્રહ્મ ॥ ૫॥

પઞ્ચરૂપપરિત્યાગા દર્વરૂપપ્રહાણતઃ ।
અધિષ્ઠાનં પરં તત્ત્વમેકં સચ્છિષ્યતે મહત્ ॥ ઇતિ ॥ ૬॥

પ્રજ્ઞાનં બ્રહ્મેતિ વા અહં બ્રહ્માસ્મીતિ વા ભાષ્યતે ।
તત્ત્વમસીત્યેવ સંભાષ્યતે ।
અયમાત્મા બ્રહ્મેતિ વા બ્રહ્મૈવાહમસ્મીતિ વા ॥ ૭॥

યોઽહમસ્મીતિ વા સોહમસ્મીતિ વા યોઽસૌ સોઽહમસ્મીતિ વા
યા ભાવ્યતે સૈષા ષોડશી શ્રીવિદ્યા પઞ્ચદશાક્ષરી
શ્રીમહાત્રિપુરસુન્દરી બાલાંબિકેતિ બગલેતિ વા માતંગીતિ
સ્વયંવરકલ્યાણીતિ ભુવનેશ્વરીતિ ચામુણ્ડેતિ ચણ્ડેતિ
વારાહીતિ તિરસ્કરિણીતિ રાજમાતંગીતિ વા શુકશ્યામલેતિ વા
લઘુશ્યામલેતિ વા અશ્વારૂઢેતિ વા પ્રત્યંગિરા ધૂમાવતી
સાવિત્રી ગાયત્રી સરસ્વતી બ્રહ્માનન્દકલેતિ ॥ ૮॥

ઋચો અક્ષરે પરમે વ્યોમન્ । યસ્મિન્ દેવા અધિ વિશ્વે નિષેદુઃ ।
યસ્તન્ન વેદ કિં ઋચા કરિષ્યતિ।
ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે। ઇત્યુપનિષત્ ॥ ૯॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ઠિતમ્ ।
આવિરાવીર્મ એધિ । વેદસ્ય મ આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીઃ ।
અનેનાધીતેનાહોરાત્રાન્ સંદધામિ । ઋતં વદિષ્યામિ ।
સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ । અવતુ મામ્ ।
અવતુ વક્તારમ્ । અવતુ વક્તારમ્ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ બહ્વૃચોપનિષત્ ॥

*Bahvrucha Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*